**पुत्रभाव** पु॰ पुत्रस्य भावः। १पुत्रत्वे ज्योतिषोक्ते २पञ्चमे भावे द्वादशभावशब्दे ३८०२ पृ॰ दृश्यम्। तत्र ग्रहादिस्थित्यादिफलादि जातकपद्धतावुक्तं यथा "शुभखगवसतिः सुतालयश्चेच्छुभवरदृष्टः शुभवीक्षितोऽपि वा स्यात्। कथयति शुभसन्ततिं नराणां स च विपरीतफलः खलस्य योगात्। चन्द्राद्विलग्नादपि पुत्रभावे वर्गो यदैकोऽपि च गीष्पतेः स्यात्। तदा वदेदौरसमेव पुत्रं बलाबलौकस्य हि तारतम्यात्। तनौ धने वा सहजे विलग्ननाथे सुतः स्यात् प्रथमं चतुर्थे। पुत्रो भवेत्तत्परतश्च पुत्रात् द्विकन्यकानां जननप्रदः स्यात्। चन्द्रभौमभृगवोद्विदेहगा चादिमे वयसि सन्ततिप्रदाः। ते पुनर्धनुषि नान्तिमे तथा प्राचि सन्ततिकरा मता विदाम्। सन्तानभावे ग्रहदृष्टियोगो नवांशयोगोऽप्यथ वाङ्कयोगः। यावन्मितः स्यात् खलु तत्प्रसंख्या स्यात् सन्ततिस्तत्नवांशतो वा। अपत्यसंख्या सुतभे नवांशाद्वाच्या द्विनिघ्ना शुभदृष्टियोगात्। शुभांशतो जीववती च कष्टा पापांशतः पापखगप्रदृष्टैः। कलिवितर्कूरकवयः कर्मात्तु द्विकलत्रगाः। क्रमात् कुर्वन्ति मनुजं तोककौतुकवर्जितम्। कविकलानिधिवर्गयुते सुते कविकलानिधियुक्तनिरीक्षिते। समभवर्गगते खलु कन्यका विषमभे तु सुतान् प्रदिशन्ति हि। दासीभवान्यपत्यानि सितांशे सुतभावगे। सितदृष्टे च केचित्तु चन्द्रादप्येवमूचिरे। शनिगणाः शनिभं सुतभे यदा शशिसुतेन दृशा प्रविलोकितम्। गुरुकुजार्कदृशा न युतं तदा प्रतनुते तनयं निजभूमिजम्। सुतभं शनिभं चेत् स्याच्छनियुक् शनिनेक्षितम्। दत्तात्मजाप्तिकृद्बोध्यं तद्वच्चेत् क्रीतपुत्रदम्। सन्तानभावे कुजसप्तमांशे मन्दान्वितेऽन्यग्रहदृष्टिहीने। पुत्रो भवेत् क्षेत्रजकोऽथ कुजः पापैर्युते पापगृहे सुतर्क्षे। चन्द्रे कुजांशे सुतगे प्रदृष्टे मन्देन नान्यैः खलु गूढजातः। शन्यंशगे सूर्यनिरीक्षिते च कुजे सुतस्थे च सुतोऽपविद्धः। शनिवर्गगते चन्द्रे शनियुक्ते च पञ्चमे। प्रदृष्टे रविशुक्राभ्यां भवेत् पौनर्भवः सुतः। रविचन्द्रमसोर्वर्गः सुतभे च तयोर्युतिः। शुक्रेण केवलं दृष्टे सहोढः कथितः सुतः। सुतालये भूसुतसंस्थितिश्चेत् संजातसंजातसुतक्षतिः स्यात्। यदा न दृष्टिर्गुरुदैत्यगुर्वोर्दृष्ट्या तयोः स्यात् प्रथमोत्थनाशः। सन्तानभावे नवमांशको यः पापैः प्रदृष्टः खलु यन्मितैः स्यात्। गर्भा विनश्यन्ति हि तत्प्रमाणा यदा न दृष्टिः शुभखेचराणाम्। काव्ये कुजे नीचरिपोर्नवांशे पराजिते वापि मृतप्रजः स्यात्। स्त्रीखेटभांशे तु सुताप्रजः स्यादन्यांशकस्थे पुमपत्यभाक् ना। पापैः सुतस्थानगतैर्धनैः स्वजनैः सुखैर्ना रहितः कुजे तु। वैकल्यभाग् व्याधियुतः शनौ तु शुभग्रहैः पुत्रधनैः प्रपूर्णः"। वर्षलग्नतः पुत्रभावफलं नी॰ता॰ उक्तं यथा

"पुत्रायगो वर्षपतिर्गुरुश्चेत् सूर्य्यौरसौख्योशनसोऽथ चेत्थम्। सत्पुत्रसौख्याय खलाहितास्ते दुःखप्रदाः पुत्रत एव चिन्त्याः। पुत्रे सुतस्य सहमे सबले सुताप्तिः सौम्येक्षितेऽप्यतिसुखं यदि तत्र वर्षे। सौम्येक्षिते शुभगृहे सकुजो बुधश्चेत् पुत्रायगः सुतसुखं विबले सुतार्त्तिः। जीवो जन्मनि यद्राशावब्देऽत्र सुतगो बली। पुत्रसौख्याय भौमो वा वर्षेशोऽत्र सुताप्तिदः। यत्रेज्यो जनुषि गृहे विलग्नमेतत् पुत्राप्त्यै बुधसितयोरपीत्यमूह्यम्। यद्राशौ जनुषि शनिः कुजश्च सोऽब्दे पुत्रार्त्तिं तनुसुतगः करोति नूनम्। पुत्रे पुण्यस्य सहमं पुत्राप्त्यै शुभदृष्टियुक्। लग्नपुत्रेश्वरौ पुत्रे पुत्रदौ बलिनौ यदि। चन्द्रो जीवोऽथ वा शुक्रः स्वोच्चगः सुतदः सुते। वक्री भौमः सुतस्थश्चेदुत्पन्नसुतनाशनः। सुताधिपो जन्मनि भार्गवोऽब्दे पुत्रे विलग्नाधिपतीत्थशालः। पुत्रप्रदो मन्दगृहस्थपुत्रे पापाधिकारीक्षित आत्मजार्त्तिः। यद्राशिगोऽग्रहः सूतौ स राशिस्तत्प्रदाभिधः। बली जन्मोत्थसौख्याय वर्षे तद्दुःखदोऽन्यथा"

**पुत्रवत्** त्रि॰ पुत्रोऽस्त्यस्य "अन्यत्रापि दृश्यते" वार्त्ति॰ वलच्। पुत्त्रयुक्ते पक्षे मतुप् मस्य वः। पुत्रवत् तयार्थे त्रि॰ स्त्रियां ङीप्।

**पुत्रशृङ्गी** स्त्री पुत्रं पवित्रं शृङ्गमिव पुष्पमस्याः ङीप्। अजशृङ्ग्यां राजनि॰। इयं सुश्रुते श्यामादिगणे पठिता।

**पुत्रश्रेणी** स्त्री पुत्रा पवित्रा श्रेणिरत्र ङीप्। मूषिककर्ण्यां रत्नमाला।

**पुत्रसङ्करिन्** पु॰ पुत्त्रे पुत्त्रोत्पादने सङ्करी। भिन्नवर्णायां स्त्रियां पुत्रोत्पादनेन वर्णसङ्करकारके भा॰क॰ ४४अ॰।

**पुत्रसहम** न॰ नील॰ता॰ उक्ते सहमभेदे। तदानयनञ्च तत्र दर्शितं यथा "सुतोऽह्नि निशि मिन्दुमीज्यात्"। स्फुटजीवादिन्दुं त्यक्त्वा दिवारात्रौ लग्नयोगे पुत्रसहमं भवति। तत्र च पुण्यसहमवत् सैकतादि ज्ञेयम्।

**पुत्रसू** स्त्री पुत्रं सूते सू—क्विप्। पुत्रप्रसवकर्त्र्याम्।

**पुत्राचार्य्य** पु॰ पुत्र आचार्य्योऽध्यापको यस्य। पुत्रतोऽध्यायिनि। मनुः ३।१६२